श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री हनुमदष्टकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री हनुमदष्टकम् ॥

अञ्जनाशुभाङ्गजातमिन्दुनन्दनन्दनं
मञ्जुभाषसाधुपुञ्जरञ्जनं निरञ्जनम्।
कुञ्जरादिपुञ्जशक्तिमञ्जसाऽहमाश्रये
मञ्जुलं प्रभञ्जनात्मजं हनूमदाह्वयम्॥ 1 ॥

तुङ्गशृङ्गमाखिलाङ्गसङ्गिगाङ्गमङ्गलो -
त्तुङ्गभङ्गभङ्गदे लसन्निवृत्तिसङ्गमे।
सङ्गतं सुपिङ्गनेत्रसप्लवङ्गपुङ्गवं
मङ्गलाङ्गनं हनूमदाख्यमेमि सङ्गतिम्॥ 2 ॥

सत्ववत्वभृत्यसत्यनित्यभीष्टदं गुरुं
मर्त्यनूनकीर्त्यमानसत्यरामभृत्यकम्।
स्तुत्यकृत्यमत्यपूर्वसत्यमत्यलङ्कृतं
नित्यकाहनूमदाख्यमेमि दैत्यहन्तकम्॥ 3 ॥

श्यामधामरामकामसार्वभौमसम्मतं
पामरामराश्रितस्य कामदामरीद्रुमम्।
हेमधामपुण्यनामतामसाक्षिभीमकं
नौमि तं हनूमदाख्यमेमि पापशामकम्॥ 4 ॥

बालभालभानुकान्तमल्पकान्तिमालिनं
लीलयात्तशैलमल्पतूलवत्सुकोमलम्।
कोसलाधिपालदत्तमालयातिशालिनं
केवलं हनूमदाख्यमेमि देवमौलिकम्॥ 5 ॥

कुण्डलादिमण्डितेन्दुमण्डलाभतुण्डको -
    दण्डरामरम्यभाण्डभूतचित्तमण्डनम्।
चण्डपण्डितं हनूमदाख्यमेमि सन्ततं
    खण्डलारिमण्डलातिखण्डनादिशौण्डकम्॥ **6**॥

वन्दनीयसुन्दरारविन्दतुल्यपादकं
    मन्दहासकुन्ददन्तमिन्दिरेशनन्दकम्।
इन्द्र वीन्द्र चन्द्र पूर्ववृन्दवन्द्यसच्चिदा -
    नन्दसान्द्रकं हनूमदाख्यमाश्रयेतराम्॥ **7**॥

क्षारभूरिवारिराशिसागरान्तद्वीपगा -
    पारमेयरामदारचोरहृत्सुदारकम्।
दारितारिवानरावतारकं निजं गुरुं
    दारिताघकं हनूमदाख्यमास्मराम्यहम्॥ **8**॥

इत्यशेषवीशशेषकेशवासवादिभिः
    स्तूयमानसद्गुणौघसद्धनूमदष्टकम्।
सन्निवृत्तिसङ्गमे सुगीतमात्ममुक्तये
    प्रीतिमेतु तेन भूतिदः सदा रमापतिः॥ **9**॥

॥ श्री हनुमदष्टकं समाप्तम्॥